# श्री गणेशपंचरत्नस्तोत्रं

मुदाकरात्तमोदकं सदाविमुक्तिसाधकं
कलाधरावतंसकं विलासिलोकरक्षकम् ।
अनायकैक नायकं विनाशितेभदैत्यकं
नताशुभाशु नाशकं नमामि तं विनायकम् ॥ 1

नतेतरातिभीकरं नवोदितार्कभास्वरं
नमत्सुरारिनिर्जरं नताधिकापदुद्धरम् ।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं
महेश्वरं तमाश्रये परात्परं निरंतरम् ॥ 2

समस्तलोकशंकरं निरस्तदैत्य कुंजरं
दरेतरोदरं वरं वरेभवक्त्रमक्षरम् ।
कृपाकरं क्षमाकरं मुदाकरं यशस्करं
मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ 3

अकिंचनार्तिमार्जनं चिरंतनोक्तिभाजनं
पुरारिपूर्वनंदनं सुरारि गर्वचर्वणम् ।
प्रपंचनाश भीषणं धनंजयादि भूषणं
कपोल दानवारणं भजे पुराण वारणम् ॥ 4

©2022 Vedam Nadam

नितांत कांत दंत कांति मंत कांतकात्मजं
अचिंत्यरूपमंतहीन मंतराय कृंतनम् ।
हृदंतरे निरंतरं वसंतमेव योगिनां
तमेकदंतमेव तं विचिंतयामि संततम् ॥ 5

महागणेश पंचरत्नमादरेण योऽन्वहं
प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम् ।
अरोगतामदोषतां सुसाहितीं सुपुत्रतां
समाहितायुरष्टभूति मभ्युपैति सोऽचिरात् ॥ 6

॥ इति श्रीशंकरभगवतः कृतौ श्रीगणेशपंचरत्नस्तोत्रं संपूर्णम् ॥

©2022 Vedam Nadam